31-तत्रत्येषु द्वीपेषु जनानां वासो दुष्करः।

32-समुद्रेऽस्मिन् शैलतुल्या हिमखण्डाः प्लवन्ते।

33-ते वात्यया नीयमानाः शश्वत् प्रवहणानि निहत्य जले मज्जयन्ति।

34- दक्षिणध्रुवसागरस्य जलं शैत्येन घनीभूतं शिलाप्रायं वर्तते।

35-न तस्मिन् द्वीपाः सन्ति, नापि तत्र प्रवहणानि सञ्चरन्ति।

36-आकाशे परिभ्रमतां गोलानां मध्ये भूमिरन्यतमा भूगोलापेक्षया बृहत्तराणि गोलान्तराण्याकाशे विद्यन्ते।

37-सूर्यचन्द्रौ सर्वाणि नक्षत्राणि च भूगोलवत् गोलानीति तत्रापि जीवराशयो निवसन्तीति च गोलशास्त्राभि-ज्ञाः कथयन्ति।

Sanskrit cümlelerin gramatik analizini yaparak Türkçeye çevirmek.